# Shri Natesha Stuti

# શ્રીનટેશસ્તુતિઃ

## Document Information

Text title : Shri Natesha Stuti

File name : naTeshastutiH.itx

Category : shiva, stuti

Location : doc_shiva

Author : bhRiNgimaharShi

Proofread by : Aruna Narayanan

Description/comments : From shrInaTarAjastavamanjarI

Latest update : July 10, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીનટેશસ્તુતિઃ

શ્રી ભૃઙ્ગિમહર્ષિપ્રણીતા
શ્રીકૈલાસે પ્રદોષે નટતિ પુરહરે દેવદૈત્યાદિવન્દ્યે
    પશ્યન્ત્યાં શૈલપુત્ર્યાં નટનમતિમુદા સ્વર્વધૂસંવૃતાયામ્ ।
બ્રહ્મા તાલં ચ વેણું કલયતિ મઘવા મદ્દલં ચક્રપાણિઃ
    ધિત્તાન્ધિતાન્ધિમિત્તાં ધિમિધિમિધિમિતાન્ધિન્ધિમી ધિન્ધિમીતિ ॥ ૧॥

નન્દી મદ્દલવાદ્યભૃદ્વિતનુતે તાન્તાં તથિત્તામિતિ
    બ્રહ્મા તાલરવં તકૃત્તકૃતત ત્તત્તત્તકૃત્તામિતિ ।
ગાને તુમ્બુરુનારદૌ તનનનાતાનાનનાતાનના
    શમ્ભૌ નૃત્યતિ સ્વર્ણસંસદિ સદા ઝઞ્ઝઞ્ઝણઞ્ઝામિતિ ॥ ૨॥

ચિદમ્બરસભાયાન્તુ નૃત્તં દૃષ્ટ્વા પિનાકિનઃ ।
બહુધાઽઽનમ્ય ભગવાન્ ભૃઙ્ગી તુષ્ટાવ શઙ્કરમ્ ॥ ૩॥

ક્રૂરં દુષ્ટતમં સ્વધર્મવિરમં ભ્રષ્ટં શઠં નિષ્ઠુરં
    નિર્લજ્જં કૃપણં કૃતઘ્નમશુચિં બહ્વાશનં હિંસકમ્ ।
આશાપાશશતપ્રવર્તિમનસં દુષ્કીર્તિભાજં જડં
    કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૪॥

સ્વપ્નેઽપ્યુત્તમગન્ધપુષ્પનિકરૈરીશાર્ચનાવર્જિતં
    ધ્યાનધ્યેયવિચારણાવિરહિતં તુચ્છં સદોચ્છૃઙ્ખલમ્ ।
દારિદ્ર્યાસ્પદમાત્મવૈરિવિશગં તાપત્રયસ્યાસ્પદં
    કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૫॥

કર્માદિસ્તુતિકારણં પરમિમં નિન્દાકરં નિન્દિતં
    લુણ્ટાકં પતિતં વિપર્યય ગતસ્વાન્તં સદા યાચકમ્ ।
કૈવલ્યાપગતં સુખારિનિચયં સર્વપ્રદાસઞ્ચયં
    કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૬॥

સત્યત્યાગદયાક્ષમાશમદમાદ્યર્થાનભિજ્ઞાનકં
    દેવબ્રાહ્મણ ગોપ્રજાતિથિપિતૃજ્ઞાનાત્મકાનર્ચકમ્ ।
વિશ્વસ્તેષ્વપકારવઞ્ચનપરૈર્મૈત્રીપરં દુર્જયં
    કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૭॥

વિણ્મૂત્રક્રિમિમાંસશોણિતમયં મેદોઽસ્થિમજ્જાત્મકં
    દુર્ગન્ધૈકનિધિં જરાપરિગતં વાતાદિદોષાસ્પદમ્ ।
દૃષ્ટ્વાપિ સ્વકલેવરં કૃશમયં તત્રાપિ રક્તં પશું
    કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૮॥

કિં વાચા બહુવિસ્તરેણ ભગવન્ મત્સન્નિભો ભૂતલે
    ભૂતો નાસ્તિ ચ નો ભવિષ્યતિ પુમાન્ દૌર્ભાગ્યચૂડામણિઃ ।
તસ્માદીદૃશમાત્મ વૈરિવિશગં તાપત્રયસ્યાસ્પદં
    કારુણ્યાકર ભોઃ પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૯॥

શાપેર્ષ્યામદલોભમોહકરણૈઃ કિં વાઽધિકારૈર્ધનૈઃ
    કિં દારૈઃ સ્વસુખૈકસાધનતયા શુશ્રૂષમાણૈઃ પતીન્ ।
છાયામાત્રફલૈરગારવલયૈઃ કિં ભૂશ્રિયોવાઞ્છયા
    સર્વં ભ્રાન્તિવિજૃમ્ભિતં હૃદય મે મુક્ત્યૈ શિવં ભાવય ॥ ૧૦॥

શાર્દૂલાઙ્ઘ્રિપતઞ્જલિપ્રભૃતિભિઃ સાકં મુનીન્દ્રૈર્ગણૈઃ
    શૈલાદિપ્રમથૈઃ હરીન્દ્રવિબુધૈશ્ચાહં સભાયાં ચ તે ।
બ્રહ્માનન્દ નિદાનતાણ્ડવસુધાસ્વાદી ભવેયં વિભો
    નાન્યદ્વાઞ્છિતમસ્તિ મે નટપતે ભૂયો નમસ્તે નમઃ ॥ ૧૧॥

ભૃઙ્ગિણા રચિતામેતાં સ્તુતિં નિત્યં પઠન્તિ યે ।
ઇહ ભુક્ત્વાઽખિલાન્ ભોગાનન્તે યાન્તિ પરં પદમ્ ॥ ૧૨॥

ઇતિ શ્રી ભૃઙ્ગિમહર્ષિપ્રણીતા શ્રીનટેશસ્તુતિઃ સમાપ્તા ।

(This is similar to bhRingikRitashivastotraM shivarahasye
with variations so treated separate)

Proofread by Aruna Narayanan

*Shri Natesha Stuti*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*